
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

सिजनवल्लभमाननोतै। श्रीमानपंमुदसकामकला

अ० रं०
१

श्रीगणेशायनमः॥ अतिललितविलासं विश्वचेतोनिवासं समरहुतविकाशं शंबरारव्यप्रणाशं॥ रतिनयनविरामं संततं चाभिरामं
प्रसभविजितवामं शर्मदं नौमिकामं॥१॥ लोदीवंशावतंसोहतरिपुवनितानेत्रवारीप्रपूरप्रादुर्भूतावुवाहिन्यमरुवरयशोलील
याप्लाविताऽरिः॥ सत्पुत्रः ख्यातकीर्तिरहमदनृपतेः कामसिद्धांतविद्वान् जीयान् श्रीलाडखानः क्षितिपतिमुकुटैर्घृष्टपादारविंदः
॥२॥ अस्यैवकौतुकनिमित्तमनंगरंगं ग्रंथं विलासविदग्धः कल्याणमल्लइतिभूयमुनिर्यशस्वी॥३॥ मतानिदृष्ट्वाबहुशोमुनीनांतत्
तत्सारमादायनिरूपयामि॥ आतांगनाकेलिकलानुरागे ग्राह्यः सदायपुरुषैः सभावो॥४॥ बिःसोरव्यगतिः प्रपंचशदृशोसारंकु
रंगीदृशांएकं भोगसुखं परात्मपरमानंदेनतुल्यंविदुः॥ तज्ज्ञात्यादिविवेकमूढमनसोलब्ध्वापिनानोगनाः॥ संविंदंतिनकामतं
त्रविकलाः पश्वादिवन्मानवाः॥५॥ पद्मिनीचित्रिणीचाथशंखिनीहस्तिनीतथा॥ क्रमाच्चतुर्धानारीणांलक्षणानिब्रुवेधुना॥
॥६॥ तत्रतावत्पद्मिनीस्वरूपंनिरूप्यते॥ पीनांरक्तकुरंगशावनयनापूर्णेंदुतुल्याननापीनोत्तुंगकुचाशिरीषमृदुलास्वल्पाशना
दक्षिणा॥ फुल्लांभोजसुगंधिकामसलिलालज्जावतीमानिनीश्यामाकायिसुवर्णचंपकनिभादेवादिपूजारता॥७॥ उन्निद्रांबुज

१

Acc. NO. ~~1712~~ 1815
Title - चण्डीस्तोत्रप्रयोग.
Author - नसजो भट्ट
Date - Samvat 1853
~~folio~~ Subject - Tantric
folio - 27 (No. 13 ची folio उपलब्ध नाहि.)
Xerox. - 52

कोशातुल्यमदनच्छत्रामरालस्वना॥ तन्वीहंसवधूगतिःसुललितंवेषंसदाबिभ्रती॥मध्यंचापिवलित्रयांकितमपोशुक्लांव
क्षिणीसुग्रीवाशुभनासिकेतिगदितानार्युत्तमापद्मिनी॥८॥अथचित्रिणीलक्षणानि॥तन्वंगीगजगामिनीचपलदृक्संगीत
ल्यान्वितानोह्रस्वानचदीर्घतराथसुकृशामध्येमयूरस्वरा॥पीनश्रोणिपयोधरासुललितेजंघेवहंतीदृशेकामांभोमधुगंध्य
थ्यैधिमपिसातुच्छोन्नतेवत्सला॥९॥कामागारवसांद्रलोमसहितंमध्येमृदुप्रायशोविभ्राजत्कुल्लसितेचवर्तुलमथोरस्यंवुना
थसदा॥भृंगीशामलकुंतलाघजलजग्रीवाषभोगेरताविशशक्तिमतीरतेस्मरुचिकांक्षयांगनाचित्रिणी॥१०॥अथशंखि
नीलक्षणानि॥दीर्घबाह्याशिरस्कशंपृथमथोदेहंवहंतीतथापादौस्वल्पतरौकटिंचवृहतींस्वल्पस्तनीकोपिनी॥गुह्यंक्षारविग
धिवासमरजलेनाल्पेनसांद्रैःकचैरानिम्नंकुटिलक्षणाद्रुतिगतिःसंतप्तगात्राभृशं॥११॥संभोगेकरजःक्षतानिबहुशोय
च्छंसर्नगाकुलीनस्तोकंनचभ्रूरिभक्षातिसदाप्रायोभरेसितला॥स्रग्वस्त्राण्यरुपोभिवांछतिदयाहीनाचपैशून्यभ्रसिं
गादुष्टमनाश्ववर्वरमहारूक्षस्वनाशंखिनी॥१२॥अथहस्तिनीलक्षणानि॥स्थूलपिंगलकुंतलाचबहुभुक्क्रूरात्रपावर्जि

अं. रंग
२

तागौरांगी कुटिलांगुली कचरणा ह्रस्वा नम्र कंधरा ॥ बिभ्रंती मम दांबु गाधि रचितं तोयं भृशं मंदगा दुःसाध्या सुरतेति गद्गद रवा स्थूलौष्टका हस्तिनी ॥ २३ ॥ अथ पद्मिनी भृतीनां सुखतिथय उच्यंते । विदाक्षी दुरसप्रसंख्यं तिथयः प्रोक्त नाक्लि स्यारते भोग्यां दिस्य दशार्तु संख्यतिथिषु श्रीजा भवे च्चित्रिणी ॥ रुद्रांभोधि गुणाय मेषु तिधिषु प्रायो द्रवेच्छंकिनी राकादर्शशशी सहमिताख्ये तीद्रवेह हस्तिनी ॥ २४ ॥ रात्रेश्चतुर्थ चरणे नलिनी द्रवत्वं संयाति चित्र दयिता प्रथमेथ यामे ॥ श्रीस्येत्तृतीय चरणः खलु शंखिनीनां नक्तं दिवार्धं मपिहस्तिवधूजनानां ॥ रजनी सुरतेषु पद्मिनी न सुखं याति न सर्गतः क्वचित् ॥ दिवसेशशियोगतोपि सा विकसत्यंबुजिनी रवेर्यये ॥ २६ ॥ इतिश्री मल्लाहु खान विरचिते प्रथमस्थलः ॥ अथ पद्मिनी भृतीनां साधारण चंद्रकला निरूप्यंते ॥ सीमंताक्ष्यधरे कपोल गलके कक्षा कुचोरस्थले नाभिश्रोणि वरांग जानु विषये गुल्फे पदांगुष्टके कृष्णाकृष्ण विभागतो मनसिजस्तिष्ठे क्रमाद्योषितां वामांगे मथ ऊर्ध्वतोभिगमना न्मासस्य पक्षद्वये ॥ १ ॥ सीमंते करदर्दीत नयने गंडेपि स चुंबनं दंतेनाधरखंडनं च नखैः कक्षांसकं ठान्लिखेत् ॥ श्रोणी चाथ कुचं करेण सुदृढं गृह्णी ।

3

भौपुनः संदृष्ट्वा स्वं चपेटकं स्मरगृहे मातंगलीलापिनं ॥२॥ कुर्याद्वक्षसि ताडनं तु शनकैर्मुष्ट्या सकृद्बुद्धिमान् जान्वंगुष्ठपदे
षु गुल्फविषमे तैरात्मनो घातनं ॥ इत्थं चंद्रकलाप्रदीपनविधौ रागाग्निना भोगिनीनीत्वा स्वीयवशं कुरंगनयना विंदंति सौ
ख्यं परं ॥३॥ अथ तासामेव पृथक्कृतया चंद्रकलोच्यते ॥ तत्रादौ पद्मिनीश्चंद्रकला कंठे सश्लिष्य गाढं मृदुकरजचयगं
डयालयोर्नितंबे पृष्ठे पार्श्वोदरे वा विदधदधरदेः खंडयंदंतवासः प्रेम्णा चुंबन्ललाटं वपुशि च जनयन्संमहर्षं नितांतं सीत्का
रप्रायवक्त्रां प्रतिपदि नलिनीं द्रावयेन्नाविदग्धः ॥४॥ संचुंब्य दंतवसनं जघने कपोले पाददये स्तनयुगे च नखानि नयने
दत्वा प्रायः प्रबद्धवदनां युगलाख्यतिथ्यां कामी नयेद्द्रवदशां नलिनी सहर्षां ॥५॥ गाढालिंगनपूर्वकं कुचयुगं संपीड्य
दंतच्छदं दष्ट्वा चाप्युरदेरथोरुकलके यच्छन्नखान्यादरात् दोर्मूले सहसा सकृन्नखपदं कुर्वंश्च तुर्थ्यां तिथौ कामसंप्र
तिबोध्य चंद्रकलया कुर्यान्निजां पद्मिनीं ॥६॥ दष्ट्वाधरं तदनु पीनकुचौ विमर्द्य प्रायेण चूचुकयुगं परिचुंब्य रागात्
७ केशान्सुदक्षिणकरेण विलोड्य मंदं कुर्यात्स विह्वलतनुं किल पंचमीषु ॥ अथ चित्रिण्याश्चंद्रकलाः अधरपरिचुंब्यं क

अं·

मेव

धरामथसंश्लिष्य नखैर्नितंबके विलिखन्नतचित्रिणीं तनुषश्चांद्रवतां नयेन्नरः ॥८॥ कंठे संपरिरभ्य बाहुलतया ना
लींभिः खन्याणिजैर्दृढ्वाचाप्सुरदल्लद्दसफुल्लकं गृह्णन्नुरोजद्वयं कुर्वन्मन्मथमंदिरे करिकरक्रीडायितं बुद्धिमानष्टम्यां
स्मरवारिनिर्झरवनीं कुर्वीत चित्रप्रियां ॥९॥ कर्णोरुस्तनमध्यपृष्टिमदनागारेषु कद्योतथा कामिन्या निजवामपा
णिकमलं कांतः समालोडयन् ग्रीवां पाणिरुहैर्लिखञ्चशंखेश्चुंबन्ललाटं स्पृशं कुर्याद्दाप्सु विसृष्टमन्मथजलां रा
मां दृशम्यां तिथौ ॥१०॥ गाढं संपरिरभ्य गंडफलके चुंबन्दशंश्चाधरौ कर्णश्रोणिनखप्रदानरसिकः कुर्यान्निमिशं
दृशोः ॥ संकृष्य श्रिकुरान्विलासकुशलः सीत्कारयुक्तां प्रियां द्वादश्यां तरयाति विह्वलतनुं कुर्यात्सुमोऽश्चिन्निर्णी ॥
११॥ अथ शंखिन्याश्चंद्रकलाः ॥ बहुभ्यां परिरभ्य गाढमधरं दंतैर्दशन्निर्दयं दोर्मूले नखपाणिजस्तनचयं यद्व
न्मपेखं स्पृशं संकुर्वन्करिनं कुचद्वयतटे नूनं तृतीयाखले मुक्तानं गजलोस्वकीयवशगां कुर्यान्नरः शंखिनी ॥१२॥
वक्षःकपोलगलकर्णपदेषु यत्नस्त्रायो नखानि परिरभ्य कृतास्यपानः ॥ गाढं विमर्द्य मदनालयमाशु नारीं स

३

द्राजयेन्नखवरैः कुरुसत्तमीषुः ॥ २३ ॥ परिरम्य दृढं रदच्छदं पिनवाद्यानवतो वरांगके ॥ नखरैः परितो वि
दारयन्स्ववशं शंभुतिथौ नयेत्स्त्रियां ॥ २४ ॥ विखनन्नखरैः शिरोधरामथ — श्च कुचौ समीलितं ॥ परिचुं
ब्य कपोलमंगनां श्लथयेदाशुतिथौ मनुसुवः ॥ २५ ॥ अथहस्तिन्याश्चंद्रकलाः मदनसदनमुच्चैर्मर्दयेन्नाभि
मूले तरलिमनिजपाणिं दंतवासौ निपीय ॥ मृदुनखकरजाग्रैः संलिखेत्पार्श्वदेशं कलितकुचयुग्मीतां वक्ष
भः संनवम्यां ॥ २६ ॥ नयने परिचुंब्य कक्षयोर्नखराघातकरतः स्मरालये ॥ रचयत्करिके लिमानयेत्स्ववशं
शंभुतिथौ द्विपांगना ॥ २७ ॥ नानालिंगनचुंबनानि रचयन्प्रायेण तीक्ष्णैर्नखैः कक्षोरस्तनमंडलान्यकरुणं
संदारयेत्केलिषु ॥ कामागारचुचूलिका चितकरः संस्यक्तरत्युंबुकादर्शे पूर्णतिथौ च निःसहतनुं कुर्यात्करो
हस्तिनी ॥ २८ ॥ इति श्रीमल्लडखानविरचिते द्वितीयस्थालः ॥ अथ शशमृग्यादिजातिभेदेन सुरतभेदान्नि
रूप्यंते ॥ आरोहे मदनांकुशस्य पुरुषाज्ञेयाः सदाथस्त्रियो योनीनां परिणाहकेरसनवांदेसांगुलीके: मा

त्॥ जात्यां तेतु नराः शशाश्ववृषभा अश्वास्तथैवांगना मृग्योश्चाद्विरदांगनाश्च कथिताः प्राकृस्तरिभिः सर्वतः
॥१॥ हरिणी शशयोर्वृषभ्वयोः समयोगः करिणी तुरंगयाः॥ भवतीहयस्य रस्यरंद्वयोर्निरतं प्रीतिरनंगसं
गरे॥२॥ हरिणी तुरंगतथाश्विका तुरंगचोच्चामिति द्वयं रतेः॥ तुरगी शशकं मृगी वृषं स्मृतमेतद्वितयं तु
नीचकं॥३॥ तुरगी हययोर्योगे रतमत्युच्चकं जगुः॥ हस्तिनी शशयोश्चाथ रतं स्यादतिनीचकं॥४॥ त
त्र प्रशस्तं सुरतं समं स्यादुच्चद्वयं मध्यमेव विद्यात्॥ नीचे धमेत्युच्चमथातिनीचमत्यंतनीचं कविभिः
प्रदिष्टं॥५॥ समयोरुधिरो भवास्त्रिधा लघुमध्योन्नचला स्मरालये॥ जनयंति बलात्तुमारतो बहुकंड
वनिताजनस्यंते॥६॥ प्रमाणहीनलिंगेन साकंडूर्नोपशाम्यति॥ अतो नवीचसंयोगेतुष्टिं गच्छति योषि
तः॥७॥ वरांगमध्यं नारीणामत्यंतकोमलं स्मृतं॥ अतिप्रमाणलिंगेन नातस्तासां सुखं भवेत्॥८॥ स
मप्रमाणलिंगेन स्थूलेन च दृढेन च॥ शयनन्मूलकंडूनिस्पंदयंश्च मुहुर्मुहुः॥९॥ कामकेलिकलाभि

ज्ञः सुखयान्विविधैर्गुणैः॥ विसृष्टकामसलिलां वशीकुर्यान्मृगीदृशं॥१०॥ नारी विसृष्टिकुसुमे भुज
लारतां तेन त्वसं करोति बहुवला नरो दनेन च॥ केवल्यमेति मुकुलीकृतचारुनेत्रा शक्नोति नो किमपि सो
ढुमतिप्रयास॥११॥ चिरमध्यमशीघ्रसंभवनरनार्योस्तु विसृष्टिरुच्यते॥ समयप्रमितिप्रभेदतो नवविधैव
सुरतं समीरितं॥१२॥ चंडमध्यममदाख्यं स्त्रीत्वेगांश्च विदुस्तयोः॥ क्रिया चात्रिविधा प्रोक्ता लघुमध्या
चिरोदया॥१३॥ अत्रापि कलभेदेन वधात्वं समूहयेत॥ सप्तविंशतिसंख्या हि कीर्तिता वैरिति बुधैः॥१४
प्रचंडवेगे बहुशो विसृष्टिः कामातुरत्वं रतिलोलता च॥ स्यान्मंदवेगे विपरीतमेतन्मध्ये भावः खलु मध्यमे
षु॥१५॥ अथ शशस्वरूपं निरूप्यते॥ प्रायः कोमलकुंतला पृथुदृशः शांताश्च तुच्छासनाः सूक्ष्मांगः शुच
यः सुवर्तुलमुखास्तुल्यास्यदंतास्तथा॥ विभ्रांतः खरपाद जानु जघन ग्रीवोरुषु स्यामजाः धन्याः खलर
ताः सुगंधिमदनं स्यंदविनीताः शशाः॥१६॥ अथ वृषलक्षणानि॥ क्रूराः स्त्रोन्नतमौलयो दृढभुजाः स्क

8

अ॰ रं॰
५

प्रौढावक्षस्थला रूक्षाः कूर्मनिभोदराश्च कठिनात्याग्यान्विताः पीवराः शोणांतस्थिरदीर्घलोचनभृतः स्वार्थकहस्तोदरा व्यालोलाब्द प्रमानवांगुलमितं कामांकुशं बिभ्रती ॥१७॥ अथाश्वलक्षणानि ॥ दीर्घस्थूलशिरोरुहश्चलदलदृगिस्फारेक्षणाः क्रोधना अत्यंतं कृशदीर्घकंदररदश्रोत्राननालोभिनः पीनोरस्थलदीर्घबाहुयुगला निद्रालवः सालसा प्रौढावक्त्रनखांघ्रिजानुयुगला गंभीरसंभाषणा ॥१८॥ दृष्टाः खंडरतेरताश्च नितरां दीर्घांगुली श्रोणयः स्थूल स्त्रीरतिलालसा बहुसुजो गह्यानुपथ्यान्विताः ॥ भूरिक्षारचिगंधिमन्मथजला॰ यास्तथा रूपाकुला आदित्यांगुलिसंमितं चतुरगा लिंगं सदा बिभ्रती ॥१९॥ अथ मृगीलक्षणानि ॥ सोद्यं कुंचितकुंतला समशिरा तन्वी सुतुंगस्तनी पुष्ट्वेंदीवरलोचनाल्पविवरघ्राणा च तुच्छोदरी ॥ आरक्ताधरपाणिपादयुगल पीनोरका मालया प्रायः कोमलचंचलं जेभुजका विस्तीर्णगंडस्थ्युती ॥२०॥ ईर्ष्यायुः सुकुमारिका पिकरवा संतं रते लंपटा बिभ्रत्यंबुजमंजुगंधि ५

मदनसंदंतथाल्पाशना।।सुश्रोणी सरलांगुलिर्गजगतिश्र्वंचलमनोरागिणीज्ञेया निम्नषडंगुलैःपरिमितंगु
ह्यंवहंतीमृगी।।२१।।अथवडवालक्षणानि।।मौलिंनिम्नसमुन्नतंविधेदेतीस्थूलजुंसांद्रैःकचैनेरिलांभोज
निभेक्षणायतगलश्रोत्राननाकोमला।।पीनश्रोणिपयोधराशुभगतिर्गंभीरनाभिर्दृढाकिंचित्पृथ्व्य
धराचमांसलभुजाक्षामोदरीकोपनी।।२२।।शोणांभोरुहचारुपाणिचरणानिद्रालुभोज्यप्रियाविस्तीर्णांद
धतींकटींचलमनाःकांतेनुरागान्विता।।कामांभःपललःप्रगंधसुचिरासंभोगकालेद्रवेविज्ञेयावडवान
वांगुलमितंगुह्यंवहंतीबुधैः।।२३।।अथकरिणीलक्षणानि।।पीनघ्राणकपोलकर्णगलकाप्रस्फारलंबोष्टि
कापिंगाक्षीदरवक्रपर्वनिवहापृथ्व्यल्पनीलालकाह्रस्वास्थूलकरांघ्रिबाहुयुगलागंभीररूक्षस्वनाकामार्त्ता
सततंस्वतीक्ष्णेदशनादुष्टाचवीतत्रपा।।२४।।दुःशीलाशवलांगिकापृथुकुचाकष्टैकसाध्यारताबृ
तंबहुभोजननीचनितरांपाल्येषुवद्धस्पृहा।।विभ्रंतीचमदोग्रगंधमपिसाकंदर्पनीरंसदाज्ञेयाभानुमितां

अ·रं·
६

गुलीकमदनावासाबुधेर्हस्तिनी॥२५॥ इतिश्रीमल्लाडखानविनोदार्थमहाकविकल्याणमल्लविरचितेतृतीयस्थ
लः॥३॥ अथांगनासामान्यधर्मोनिरूप्यते॥ इतिनिर्दिष्टभेदानांव्यभिचारोपिलक्ष्यते॥ श्रेष्ठमध्याधमत्वेन
तोकार्याचविशेषतः॥१॥ यावत्षोडशसंख्यशब्दमुदितावालानतास्त्रिंशतंयावत्स्यात्तरुणीनिवाणविशि
खप्रख्यंतुयावद्भवेत्॥ साप्रौढात्यभिधीयतेकविवरैःवृद्धातुऊर्ध्वास्मृतानिंद्याकामकलाकलापविधि
षुत्याज्यासदाकामिभिः॥२॥ वालानवीनसुरतेमुदितातमिस्रेसंजायतेथतरुणीमहतिप्रकाशे॥ प्रौढा
प्रकाशतमसोःसमुपैतिसौख्यंवृद्धातुनक्कचनजीवनहारिणीसा॥३॥ वालातांवूलमाल्याद्यैस्तरुणीभू
भूषणैःसुप्रेम्णारंज्यतेप्रौढावृद्धास्वालापगौरवैः॥४॥ कृशातनुरतिदीर्घोनिम्नकक्षाचकृष्णासुचि
रपतितकुचा कामिनीस्या धमा पृथुलतरशरीरागौरवर्णाचखर्वासरलसुरतयोगागूढकक्षाहृष्टा
स्यात्॥५॥ अथप्रकृतिलक्षणानि॥ श्रेष्ठावलासप्रकृतिःपित्तलामध्यमास्मृता॥ अधमावातलानारी ६

११

न लक्ष्माण्यभिदध्महे ॥ ६ ॥ सुस्निग्धदंतनखलोचनपद्मयुग्मा मानोन्नता प्रियतमे सुदृढानुरागा ॥ श्यामा
धर्शीलमधुमांसलगुह्यरंध्रा प्रोक्ता कफप्रकृतिरेव पुरा पुरंध्री ॥ ७ ॥ स्यात्पित्तलाथ रोगांगी शोणलोच
नपाणिना ॥ क्षणरुष्टप्रसन्ना च पीनश्रोणिपयोधरा ॥ ८ ॥ विश्रांतिर्घर्मसलिलं विस्रगंधिसुबुद्धिका ॥
श्लथकोष्ठवरांगी च कुशला सुरते मृदुः ॥ ९ ॥ वातला तु कठोरांगी रूक्षकेशा प्रलापिनी ॥ चंचला बहु
भोज्या च कृष्णपाणिजलोचना ॥ १० ॥ श्यामधूसरवर्णा च सुरते कठिणा भृशं ॥ गोजिह्वाभरवस्पर्शा वि
भ्रांतीमदनालयं ॥ ११ ॥ अथ देवसत्वादयेउच्यंते ॥ प्रसन्नवक्त्रांबुजसौरभांगी संतोषयुक्ता शुचिक
र्मदक्षा ॥ प्रियंवदा भूरिधना जनाढ्या नारी यमुक्ता विरुदेवसत्वा ॥ १२ ॥ संगीतलोलरतिका शांता सुगं
धमाल्यादिरुचिः शुभांगी ॥ विलासिनी निर्मलचारुवेषा गंधर्वसत्वा वनिता प्रदिष्टा ॥ १३ ॥ अपेतलज्जा
मधुमांससक्ता पीनस्तनी चंपकगौरदेहा ॥ रोषान्विता संततभोगवांछा प्रोक्ता कवींद्रैः खलु यक्षसत्वा

अ० रं०

७

॥१४॥ आतिथ्यसंख्यादिषु बद्धभावाऽनुरागिणी निर्मलचित्तवृत्तिः॥ नानाव्रतैरेभिर्न च प्रयासैर्मनुष्यसत्वां परिकीर्तितासा॥१५॥ दुश्चारिणी कुत्सितभूरिभोज्यहृष्टातिपुष्टापरितप्तगात्री॥ खर्वातिकृष्णा सविकारवक्त्रा मालिन्ययुक्तेति पिशाचसत्वा॥१६॥ व्याकुलत्वातिशीला च सोच्छ्वासं बहुजल्पते॥ निद्रासक्ता च सततं नागसत्वेति सा स्मृता॥१७॥ उद्वेगं निःफलं कुर्यान्नेत्रे संभ्रामयेन्मुहुः अतिक्षुधार्ता सततं काकसत्वेति सोच्यते॥१८॥ अत्यन्तचपला या तु सततोद्भ्रान्तलोचना॥ दंतसंगरसक्ता च कपिलत्वेति तां विदुः॥१९॥ स्वभावाद्दुष्टवाक्यानि विप्रियाण्येव भाषते॥ अथ तेरागाल्लानादौ खरसत्वेति सा स्मृता॥२०॥ जातिसत्वादयो ये तु नारीणामत्र भाषिताः॥ प्रधानाप्रकृतिर्ज्ञेया तेषु सर्वेषु पंडितैः॥२१॥ अथ स्त्रीणां नाशहेतुरुच्यते॥ पितृसदननिवासः पुंश्चलीसंगतीभिः प्रवसनमपि पत्युर्वार्ध्यके सेर्ष्यता च॥ वसतिरपच पुंभिर्दुष्टशीलैः स्ववश्यं क्षतिरपि निजवृत्तेर्योषितां नाशहेतुः॥२२॥ अथ वैराग्यहेतुः कार्पण्याद्दतिमान—गविरहो द्योगादिपारुष्यतो मालिन्यो समयद्युतादि भयतेशोकाद्दरिद्राद्दपि॥ भर्तॄणां तनुतादिभिश्च वपुषः काठिण्यतः शंकनाद्दोषाणां च वृथाश्रयां तु वनितावैरा

७

ग्यमुच्चैः सदा ॥ २३ ॥ अथ विरक्ता लक्षणानि ॥ नाभिपश्यति भर्तारं नोत्तरं संप्रयच्छति ॥ वियोगे सुखमाप्नोति सं
योगे चातिसीदति ॥ २४ ॥ शय्यामुपगताशेते वदनं मार्ष्टि चुंबतो । तस्मिन्नेमार्ष्टि मानं च विरक्ता नाभिवांछति ॥
२५ ॥ अथ प्रीति रुच्यते । नैसर्गिकी विषयजा समा चान्यासिकी तथा ॥ चतुर्विधा तु विद्वद्भिर्दंपत्योः प्रीति रुच्यते
२६ ॥ अभ्यास विषया साध्या दंपत्योः सहजा मुया ॥ सांद्रा निगूढभूता च प्रीतिर्नैसर्गिकी मता ॥ २७ ॥ माल्याचं
दनभोज्याद्ये विषयैर्वर्द्धितानुया ॥ प्रीतिर्विषयजा चोक्ता समयोगे समास्मृता ॥ २८ ॥ आखेट देवपूजादि के
लि संगीत कर्मसु ॥ अभ्यासयोगाद्या वृद्धि याति साभ्यासकी मता ॥ २९ ॥ अथ योनिस्वरूपं ॥ योनिरभ्यंतरे का
पि पद्माकिंजल्ककोमला ॥ कास्याक्कुटिका कीर्णा काचिद्वल्लीचयाकुला ॥ ३० ॥ गोजिह्वा भखरस्पर्शा काचि
दभ्यंतरे भवेत् ॥ पूर्वं पूर्वतरा तासु श्रेष्ठा ज्ञेया विचक्षणैः ॥ ३१ ॥ योनिमध्येस्ति नाडी का कामांकुशसमाहिता
लिंगेन क्षोभिता सैव मदवारि निरंतरं ॥ ३२ ॥ कामातपत्रा सृजति सस्यदहनि कीर्त्यते ॥ वा रांगरंध्रादूर्ध्वं तु नासिका

भयदास्तितत्र॥३३॥ मन्मथच्छत्रमित्याहुः राढ्यं मदाशिराचयैः॥ योनिरंध्रेनातिदूरास्पूर्वचंद्रास्तिनाडिका॥३४॥
मनोजवारिसंपूर्णा स्त्रीणां तिष्ठति सर्वदा॥ तद्विसृष्ट्यादता नारी प्रोच्यते पूर्वसूरिभिः॥३५॥ अथ भोजनादिव्य
वस्था॥ भोजनं द्विगुणं स्त्रीणां बुद्धिश्चैव चतुर्गुणे॥ निश्चयः षड्गुणः पुंसः कामश्चाष्टगुणस्तथा॥३६॥ अथात्म
साध्या च्यते॥ रंगादिभ्रांतदेहा चिरविरहवती समान्त्रप्रसूता गर्भालस्या च नव्यज्वरयुत ननु कामसक्तमान
प्रसंना॥ स्नानापुष्पावसाने न चरति समये मेघकाले वसंते प्रायः संपन्नरामा मृगशिशुनयना स्वल्पसा
ध्या रतेस्यात्॥३७॥ कंदर्पयुद्धे प्रथमेल्पभावा चिरेण तृप्तिं प्रथमेलभंते॥ शीघ्रं द्वितीये घटनं भूरिभावाः
पुंसः क्रमोयं विपरीत उक्तः॥३८॥ अथरताभिलाषचिह्नानि संगृह्य स्पलकान्मुहुस्तनयुवस्त्रेण न्या
दयेदंतेनाप्यधरं दशेच्च विरमे संजात लज्जा क्षणं प्रायचुंबनिबालके निजवपुः संभेजते भंजसे रथ्यां
चापिहृणद्विपश्यति च दोर्मूलं सहस्यादरात्॥३९॥ आलिंगेत्स्व सखीं प्रिये प्रलपति प्रस्तूतरंचायते प्रव्य

कं नच भाषते स्मितमुखी व्रीडावस्थां धारयेत्॥ व्याजेनैव विलंबितेन प्रकुरुते मौलौ च कंडूयनं नारीणां सु
रतस्पृहा बुधजनैर्ज्ञेयेति भावैः सदा॥१०॥ इति अनंगरंगे चतुर्थस्थलः॥४॥ अथ वनिताचां देशधर्मो व्य
ते॥ विचित्रवेषाशुचिकर्मदक्षा सुशिल्पिनी दंतनखादिरक्ता॥ मनोजसंग्रामविनोदरंगा स्यान्मध्यदेशप्र
भवा पुरंध्री॥१॥ उपभोगकलानुरागिणी चिरसंभोगरतप्रतोषिणी॥ करघातनतुष्टमानसा वनिता मा
लवदेशसंभवा॥२॥ अभिषेचनरुचिर्विरज्यते नखदंतैः परिरंभलालसा॥ बहुचुंबनहारिमानसा व
निताभीरसमुद्भवा स्मृता॥३॥ परिरंभणलोलुपा रदक्षतघाते द्रवमेति सत्वरं॥ कुसुमारतनुर्मनोरमां
सुरते निस्यति लाटकामिनी॥४॥ मृदुद्विराचारनावहंती रतार्जिसुचैर पिनमीदक्षा॥ रूपाविहीना निमनो
रमांगी स्याद्देशकर्णाटभवा पुरंध्री॥५॥ नितांतकंडूतियता स्मरालया द्रवेति चंडध्वजयातनाचिरं॥
रतिप्रयोगे चतुरा द्वयो विलैः प्रकीर्तिताः कोशलराष्ट्रसंभवाः॥६॥ यश्च्छास्यमनोरमाश्च वनितारोसा

अं. रं.
९

वेक्षवाग्विभ्रमानिर्लज्जाश्चपल्लाः कलास्कुशलागाढानुरागान्विताः ॥ नार्यः पाटलिपुत्रजा अपिमहा
राष्ट्रोद्भवाः संततं नानावेषविनोदभावरसिकाः संकीर्तिताः पंडितैः ॥ ७ ॥ कुसुममृदुशरीरा चुंबनालिं
गनादौ बहुतरधृतभावा क्रूरचेष्टाविरक्ता ॥ विषमविशिकयुद्धे स्तोकवेगा पुरंध्री भवति रत्ननेत्रा
वंगजा गो उवाच ॥ ८ ॥ विपरीतरताभिलाषिणी गतलज्जा नखदानतोषिणी ॥ नितरामनुरागशा
लिनी मदनार्ता कथितैव मुत्कली ॥ ९ ॥ प्रियंवदा कोमलदेहवल्ली स्पर्शं द्रवंती स्मरकेलिरंगे ॥ विलास
दक्षा प्रचुराचरागा स्यात् कामरूपप्रभवा पुरंध्री ॥ १० ॥ निजदोषनिगोपने रताः परदोषग्रहणेषु तत्पराः ॥
वनिता नववासस भवा दृढदेहाः परिकीर्तिता बुधैः ॥ ११ ॥ उपभोगरता सुलोचना लघुसंभोगविधि
प्रतोषिणी ॥ शुभवेषधरा विचक्षणा कथिता सा खलु गुर्जरा बुधैः ॥ १२ ॥ प्रचंडवेगा अतिकष्टसाध्या
सुकोपवत्यश्चलनेतुपाताः ॥ भवंति दुष्टाः किल सिंधुजाता भवति वाह्लीकभवाश्च नार्यः ॥ १३ ॥ नानो ९

17

पभोगरसिकारतिरंगदक्षाप्रोत्फुल्लपद्मनयनाप्रियबद्धरागा ॥ कंदर्पदर्पपरिदीपनभावशालाज्ञेया

बुधैर्मृदुरतिः खलुतीर्थभुक्ति ॥ १४ ॥ संभोगाशिक्षाः कुशलाः सलज्जाः प्रियोपभोगा अतिचंडयोगाः

मनोरमापुष्पपुरेप्रसूता स्सुरंगनामइतिरंगआश्च ॥ १५ ॥ मध्यः सुवाचोलघुभोगसाध्याः समाह

साश्रीतंभयत्रपाश्च ॥ समानरूपाद्रवडे प्रजाताः सौवीरभेदेमलयेचनार्यः ॥ १६ ॥ नखादिविन्या

सकलाविहीना संभोगसंदर्शनजाततोषः ॥ स्वभावतोदुष्टतमाः प्रचंडाः कांभोजयोद्भवाः पुरं

ध्रः ॥ १७ ॥ दुर्गंधिगात्रालघुभोगतुष्टाः सचुंबनाश्लेषणभावहीना ॥ म्लेच्छांगनापर्वतजाताजातना

स्त्री यौगांध्याश्चगांभीरभवास्तथैव ॥ १८ ॥ जात्यादिसाम्यमितितत्वजएवयस्तुजारः सकलकामक

लाप्रवीणः ॥ संतोषयेच्चसततंसुरतप्रयोगैः प्राणैः समत्वमुपयातिसकामिनीनां ॥ १९ ॥ इतिअनं

गरंगे० पंचमस्थलः ॥ अथद्रावणादियोगनिरूप्यते ॥ प्रागेवपुंसः सुरतेनयाचनीरिद्रवेद्भोगफले

ननावत्॥ अंतोबुधैः कामकलाप्रवीणैः कार्यः प्रयत्नो वनितद्रवत्वे॥१॥ जात्यादिसाम्यं दुहितेयं सांकार्या
दिविशेषतः॥ अतिएवोतिसौख्या च कलापीदारगोचराः॥२॥ तस्माल्लोकहितार्थाय दंपत्योः सुखसिद्ध
ये॥ नानौषाधिविधानेन द्रवयुक्तिर्विधीयते॥३॥ मधुना सहितं चोषा चूर्णं यस्याः परांगके॥ निक्षिप्य
तेन तां गीसा पुंसः प्राक् द्रवतो व्रजेत्॥४॥ शुद्धं शंकरबीजं च जातीरसविमर्दितं॥ वरांगे मध्ये निक्षिप्तं
नारीसंद्रावयेद्रते॥५॥ चिंचाफलं ससिंदूरं माक्षिकेन समन्वितं॥ क्षिप्तं गुह्ये रते योषा प्रागेव द्रवतामने
त्॥६॥ कर्पूरं टंकणं शंभुबीजं चेति त्रिभिः समैः॥ सक्षौद्रैर्लिप्तलिंगस्तु नरः संद्रावयेत्स्त्रियं॥७॥ मध्वा
ज्जागस्य पत्रोद्यरसं समर्दितेन च टंकणेन ध्वजं लिप्त्वा द्रावयेद्बलां नरः॥८॥ जीर्णो गुडश्चिंचिणि
काफलं च चोषा रजः क्षौद्रयुतं समांशं॥ एवं ध्वजे यः परिलिप्य शेफं कुर्यात्स्मरे तस्य तिमंगनानां॥९॥
मचिचकनकबीजैः पिप्पलीलोध्रयुक्तैः विमलमधुविमिश्रैर्मानवो लिप्तलिंगः स्मरसमरविलासे

कष्टसाध्यं च नारीस पगनर निरागा स्तंविदजस्त्रं ॥१०॥ अथ स्तंभनविधिः ॥ पतनान्मदनो भस्मस्वरा परितोषो न भवेद्विलासिनां ॥ सुरतेस्तवविद्धहेतवे स्तदयं स्तंभविधिर्निरूप्यते ॥११॥ लज्जालुमूलगोक्षीरं वक्त्रीक्षीरेण वा पुनः ॥ पिष्ट्वा स्वपादो संलिप्य चिराद्वीजं न मुंचति ॥१२॥ अथ कौसुंभे तैले नवषा भूरजसा पिबा ॥ लिप्तपादः पुपान्नेतो मजहा निरजेजवा ॥१३॥ सितायाः काकजंघायः मूलं श्वेताञ्च केसरं ॥ क्षौद्रेण नाभिलंपेयाद्वीजस्तंभनकामिनः ॥१४॥ संपाकं शंभुबीजं च कर्पूरं च समांशकं ॥ मधुना लेपयेन्नाभौ यः स बीजं न मुंचति ॥१५॥ सितकोकिल नाम्नाश्च बीजं पुष्ये द्धृतं कटौ ॥ बद्धं लोहितसूत्रेण बीजस्तंभं करोत्यलं ॥१६॥ सप्तपर्णस्य वीजं वा रविचारे समुद्धृतं ॥ वक्रोद्धृतं नराणां वीजं स्तंभाति सुरते विते ॥१७॥ श्वेतपुंखामूलं वा पुष्यार्के प्राप्य यः कटौ ॥ कन्याकर्तित सूत्रेण बध्नाति स भजे च्चिरं ॥१८॥ बीजं सितपिकाख्यस्य वटक्षीरेण ये पिता ॥ करंजबीजमध्यस्थं स्तंभं नवदने ध्रुतं ॥१९॥ अथ वाजीकरणं

20

अ॰ र॰
११

शक्तेरभावात्संभादिसर्वमेवाप्रयोजकं ॥ अतः शरीरपुष्ट्यर्थं वाजीकरमुच्यते ॥ २० ॥ चूर्णं विदार्याः स्वर
से भावितं मानुषोसितं ॥ मध्वाज्यमिश्रितं लिह्वा भजते वनितादश ॥ २१ ॥ स्वरसे भावितं धात्री चूर्णमा
ज्यासिताऽन्वितं ॥ क्षौद्रेण किल खन्नात्रो वृद्धोपि तरुणायते ॥ २२ ॥ काम्पिगोक्षीर गोरक्षवला नागवलाभ
वं ॥ चूर्णं च शतपुत्र्याः पीतं क्षीरेण पौष्टिकं ॥ २३ ॥ सितासाधित गोक्षीरे माषान्संभाव्य शोषयेत् ॥ भा
नुपादैः पुनस्तेषां चूर्णस्य वटकं शुभं ॥ २४ ॥ कृत्वा घृतेन संसाध्य प्रदोषे भक्षयेत्सदा ॥ वृद्धोपि प्रबलो
भूत्वा भजते कामिनीशतं ॥ २५ ॥ मध्वाह्व चूर्णं कर्षं वा लिह्या मध्वाज्य मिश्रितं ॥ पिबेत्तदनु गोक्षीरं यः स
नारीशतं भजेत् ॥ २६ ॥ बीजं सितपिकाख्यस्य तंडुलाः षष्टिकोद्भवाः ॥ द्वयोः कर्षं लिहेत्वा ॑ मधुना द
ृतां व्रजेत् ॥ २७ ॥ सतत्रारसप्तपिंस्तुल्यं तद्दशाघापयः ॥ दत्वा संसाधितं क्षौद्रं सिताभ्यां पौष्टिकं परं
॥ २८ ॥ मृतायास्त्रिफलायष्टि चूर्णं मधुघृतान्वितं ॥ दिनांते लेहयेन्नित्यं स नारी सुरतेजयेत् ॥ २९ ॥ ११

अथस्थूलीकरणं॥ लघुसूक्ष्मेन लिंगेन नैव तुष्यंति योषितः॥ ततस्तु प्रीतये वक्ष्ये स्थूलीकरणमुत्तमं॥ ३०॥ बलानागबलाकुष्टंवाजिगंधाहयारिपुरिति सर्वंसमांशकं॥ ३१॥ सचूर्ण्य नवनीतेन लिंगलेपो विधीयते॥ मुहूर्तादिति सूक्ष्मं च वाजीलिंगसमं भवेत्॥ ३२॥ जातीरसशिलाकुष्टयोषाटंकणचूर्णकैः॥ तिलतैले मुनैर्लेपो लिंगवृद्धिः प्रजायते॥ ३३॥ सैंधवं मरिचं कुष्टं वृहतीखरमंजरी॥ हयगंधायवामाषाः पिप्पलीगौरसर्षपाः॥ ३४॥ तिलाश्वेतानि संपिष्य मधुनोद्वर्षनं बुधः॥ प्रयोजयेत्कर्णपालीस्तनलिंगविवर्द्धनं॥ ३५॥ भल्लातं वृहन्मवर्णेनालिनीदलमेव च॥ दग्ध्वा तद्भस्म वृहतीफलेजेनांभसासह॥ ३६॥ महिषीगोमये पूर्वं मृष्टालिंगं विलेपयेत्॥ तत्क्षणान्मुसलाकारं दृढं चैव भवेद्दृढं॥ ३७॥ लोध्रकासीसमातंगवलाकल्के स्तिलोद्भवो॥ तैलं संसाधितं कर्णलिंगयोनिविवर्द्धनं॥ ३८॥ अथसंकोचनं॥ प्रौढानचप्रसूतानां श्लथ्यांयंनरो

नरोचते॥पूनामतस्तत्संकोचविधिंसंक्षेपतोब्रुवे॥३९॥सनालकमलंपिष्ट्वापयसाकारयेद्वटीं॥तांनिधायक्षणंयोनौ
वृद्धापिस्यात्कुमारिका॥४०॥देवदारुनिशायुग्मसरसीरुहकेसरैः॥सलिप्तमदनछत्रंसंकोचंपरमंव्रजेत्॥४१॥लिह्या
पिकाख्यबीजैश्चवारिपिष्टैःस्मरालयं॥नियमेनपरंगाढंवरांगंलभतेगता॥४२॥त्रिफलाधातकीपुष्पंजंबूलकुसा
रसैःसमैः॥साक्षौद्रैर्लिप्तगुह्याचकन्येवजरतोभवेत्॥४३॥कटुतुंबीभवैर्बीजैःस्मरोध्रैःसैरेमंदिरे॥लिप्त्वानवप्रसू
ताचधृवकन्येवजायते॥४४॥वाजिगंधावलाव्योषनिशेंदीवरकुष्टकैः॥तोयपिष्टैःस्मरागारंलिप्तंगाढतरंभवे
त्॥४५॥मधूककाष्टसारेणश्लक्ष्णेनमधुनासह॥वरांगपूरितंयत्नाद्दस्यंतंदृढतांव्रजेत्॥४६॥अथयोनिसंस्का
रः॥लघुग्नौसार्षपंतैलंजातीपुष्पैःप्रसादयेत्॥नारीगुह्यंतदाभ्यंगाद्यद्गंधीसुरतनयेत्॥४७॥खुरदारुमिला
रुष्टदाडिमांजनकांचनैः॥तैलंसुगंधिमभ्यंगाद्योनिसुरभितांनयेत्॥४८॥अथलोमनाशनं॥कटुतैलेनाग
चूर्णंक्षिप्त्वासप्ताहमातपे॥निध्येयंमर्दनात्तत्तुयोनिलोमापहारकं॥४९॥सप्ताहंभावितंशंखभस्मरंभांभसा १२

नीलस्तैलैः कटौ मार्ध्विजायन्ते प्रसवाल्वरा ।। ७१ ।। ॐ जन्मथ सथ्यमथवाहिनी वालस्योदरं मुंचमुंच लघुस्वा
हा ।। इति मंत्रेण सजलं पातुं जलेदयं बुधैः ।। स्तेंगनासुखं शीघ्रं मंत्रराजप्रसादतः ।। ७२ ।। अथ वंध्यात्वापाद
नं ।। गुडं त्रैहायनं पाति पलमात्रं तु नित्यशः ।। मासार्द्धं सा भवेद्वंध्या यावदायुर्न संशयः ।। ७३ ।। तुषाजोयेन संका
थमूलमग्निनरुद्भवं ।। पुष्पावसाने त्रिदिनं पीत्वा वंध्याभिजायते ।। ७४ ।। कदंबस्य फलं पादं माक्षिकायादिन
त्रयं ।। पीतमुत्स्नोदकेनैव वंध्यात्वं प्रतिपादयेत् ।। ७५ ।। अथ केशोद्भवरंजनविधिः ।। गव्येन पयसौंश्वरक
ल्केनासिद्धं तैलं तिलोद्भवं ।। पातं कार्श्यं च सर्वत्वं केशानां हेति लेपनात् ।। ७७ ।। गुंजाफलरजः क्षौद्रयुक्तं लेपा
न्निहंस्त्रलं ।। इंद्रलुप्तं तथा केशाबद्धरोहणकारणात् ।। ७८ ।। दग्धेभदंतसंश्लक्ष्णं पिष्ट्वा तेन प्रलेपयेत् ।। इंद्रलु
प्तं क्षयं याति केशारोहं ति भूरिशः ।। ७९ ।। आम्रप्रसूनांत्रिफलात्वक्कूपोडवत्तरोरपि ।। पिंडरत्तं चेति कल्कैः
तिलं तैलं प्रसाधयेत् ।। ८० ।। नीलं तैलमिति ख्यातं केशसंरंजनं परं ।। क्षिप्तो त्याहं हसं पक्षो पिष्टुवं मेक

पिष्टं तिलपुष्पं सगोक्षुरं ।। सप्ताहं लेपनात्कुर्यात् केशान्दीर्घा
न्बहूनपि ।। ७६ ।। दंतीसा ५

तांजयेत्॥८१॥माजूफलकणानीलीसैंधवैःसारनालकैः॥पिष्टैःशिरोरुहालाभाःश्यामवर्णाभवंति॥८२॥नि
बतैलमिदिव्यानि मासैकं यःपिबेन्नरः॥मुक्तकेशाःक्रमेणैवतस्यपाल्यलितुल्यतां॥८३॥गोरोचनाःकृष्णति
लाःकाकमाचीशतावरी॥आमोभिर्विकुरालिह्याःश्यामतांयातिसत्वरं॥८४॥अथश्वेतीकरणं॥तिलानां
स्नुहिदुग्धेनभावितानांतुयद्भवेत्॥तैलंतल्लेपनात्केशास्फटिकाभाभवंतिहि॥८५॥वज्रीक्षीरेणयाधात्री
भावितामज्जनात्तया॥तत्क्षणादेवमर्त्यानांनिपतंतिस्फकंचन॥८६॥अथमुखकंटकहरं॥वचार्कट
कथात्र्यानांलेपनाद्योवनोद्भवः॥मुखरुछाःपिठकायांतिनरनार्योःक्षयंक्रमात्॥८७॥कंटकैःशाल्म
लेर्यश्चक्षीरपिष्टैर्विलेपयेत्॥मुखंतस्यापिपिटिकानाशंगच्छंत्यसंशय॥८८॥लोध्रसैंधवसिद्धार्थवच
नांपरिलेपनात्॥गाढरुछाःपिटिकायांतिदेहिनांसंक्षयंक्रमात्॥८९॥अथनीलीकरणं॥तिलद्विजीरसि
द्धार्थान्पिष्ट्वाक्षीरेणलेपयेत्॥यःसप्ताहजपेन्नीलीचंद्रवद्वदनंभवेत्॥९०॥केरिकंशोणयष्टीवमे

धनादनिशाद्वयं॥पिष्टा रंभांसभालेपात्सप्ताहं नीलिकाञ्जयेत्॥९१॥अथकुचसंस्कारः॥वाजीगंधाव
चाकुष्टकणांश्वानिर्लेवंगकान्॥नवनीतांबुसंयुक्तंलेपात्कुर्यात्कुचावृथक्॥९२॥कोलमज्जाहयारिश्वभुजं
गस्यवसासमाः॥एतेषांमर्दनात्स्त्रीणांकुचायोत्यांतिपीनतां॥९३॥श्रीपर्णिरससिद्धंकटुतैलविलेपनात्॥पतिता
वापिसंकुर्यात्पीनोत्तुंगौकुचौस्त्रियः॥९४॥दाडिमीकल्कसंसिद्धंकटुतैलंविमर्दनात्॥स्तनौचारुत्तरौपीनौनि
त्यंकुर्यान्मृगीदृशः॥९५॥तैलंतिलोद्भवंगव्यंघृतंवार्कपयःसमं॥वालाशामलतात्र्योषलज्जालुश्वनिशाद्व
यं॥९६॥एतेषांकल्कसहितंपचेन्मृद्वग्निनासुधीः॥तेनस्येनकुचास्त्रीणांशीघ्रंयातिविशालतां॥९७॥वला
तंडुलतोयेनतैलमेतत्पिबेद्यदि॥पीनोत्तुंगौकुचौनस्यानयंतेतौकदाचन॥इतिश्रीअनंगरंगषष्ठमस्थलः
अथवशीकरणादिकंनिरूप्यते॥सारमुद्धृत्यसंक्षेपाद्वशीकरणमोहनं॥कामिनांप्रीतिजननंकिंचिदत्रनिगद्य
ते॥१॥तत्रादौतिलकंविधिः॥लज्जालुर्मधुकंद्रव्यंनलिनीमूलमेवच॥एतल्लिप्त्वास्ववीर्येणयःकुर्यात्ति

अ॰रं॰
१५

लकः पुमान्॥२॥तत्क्षणादेवनश्यंतिवसतांभुवनत्रं॥वात्स्यायनेनमुनिनाप्रोक्तोयंयोगउत्तमः॥३॥श्वेतार्कमू
लंमंजिष्टावचामुस्तंसकुष्टकं॥स्त्रियोनिशोणितेनैतंदेकील्लत्यललाटके॥४॥शुभंतिलकमादत्तेयःसलोकत्र
यंक्षणात्॥नयतिस्ववशंप्राज्ञःसुचिरंमोदतेभुवि॥५॥तगरंपिप्पलीमूलमेषश्रृंगीकणाजया॥एतत्समंस्वयंचांग
मलेनीलेकतांसुधीः॥६॥मधुनातिलकंकुर्याद्यःक्षोणीसुतवासरे॥जगत्सर्ववशीकुर्यात्स्वपुमांनात्रसंशयः॥
७॥गोरोचनांचसंभाव्यंस्वपुष्परुधिरेणवा॥कुर्यात्तिलकंभालेसपतिंमोहयेद्ध्रुवं॥८॥अथांजनविधिः॥म
हाष्टमीदिनेप्रातुपातितंनरमस्तके॥स्मशानेकज्जलंविश्वंमोहयेन्नयनांजनात्॥९॥रोचनाकेसरंकन्याशि
लाचैभिविरोचन॥योजपेदृष्टिपथगंसर्वमेवविमोहयेत्॥१०॥तालीसकुष्टतगरैःपिष्ठ्वाक्षीमीसुवर्जितो॥
सिद्धार्थतैलनिक्षिप्यकज्जलंनरमस्तके॥११॥पातयेदंजनात्तस्यसर्वदाभुवनत्रये॥दृष्टिगोचरमायातःसर्वो
भवतिदासवत्॥१२॥शिलाकिंजल्कफलिनीरोचनानांतथांजनात्॥पुष्पार्कयोगेतिलकंदंपत्योर्मोहनंपरं

क्षिप्तांशिरसि मोहनं॥

॥१३॥ अथ चूर्णविधिः॥ यः स्वरेतं समादाय रतांते सव्यपाणिना॥ वामपादे स्त्रियो लिंपेत्सा तस्य वशगा भवेत्
काकजंघासिताः पक्षो भ्रामरो कुष्टमसलं॥ मूलं तगरजं चैषां चूर्णं क्षिप्तं विमोहयेत्॥१४॥ वासांतिकदलं पुंसो
मलं मालाशवस्य च॥ पक्षावलेरिदं चूर्णं चूर्णं मोहनकं परं॥१५॥ सप्तच्छदं शिवाक्षं च क्षोणेयं च समांशकं
॥आमषांशिरसि क्षिप्तं चूर्णं मोहनकं परं॥१६॥ अथ भक्षणविधिः॥ अंत्रादि सर्वं निष्काश्य खंजरीटोदरं
कुंजे। पूरयित्वा स्ववीर्येण शरावसुगुलो क्षिपेत्॥१७॥ मुद्रां कृत्वा तदेकांते सप्ताहं धारयेत् सुधीः॥ पश्चात् नि
ष्काश्य संपिष्य वटीः कृत्वा विशोषयेत्॥१८॥ सभक्षण विधानेन दीपमाना परस्परं॥ दंपत्योर्मोहजननी की
र्तिता वटिकायनाः॥१९॥ अथ लेपविधिः॥ यः स्वरेतं समादाय रतांते सव्यपाणिना॥ वामपादे स्त्रियो
लिंपेत्सा तस्य वशगा भवेत्॥२०॥ या प्राग शेषं कांतस्यालिंगं वामांघ्रिणं स्पृशेत्॥ यावदायुर्भवेद्दासः सत
स्यान्नात्र संशयः॥२१॥ कपोतविष्टा सिंधूह्य मधुकैः समभागिकैः॥ पिष्ट्वा लिंगं भजेद्या सा दृसगास्या ह

न॰रं॰
१६

रांगना ॥२२॥ घनसारं समल्लूकं मेंद्रं च मधुना सह ॥ पिष्ट्वा लिख्य ध्वजायां च भजने शा वशी भवेत् ॥२३॥ अथ
धूपं ॥ चंदनं कुंकुमं व्याधिः कालो— कुसुमं जलं ॥ देवदारु च संपिष्य मधुना सह मिश्रयेत् ॥२४॥ चिंतामणिरिति ख्यातो धूपः परममोहनः ॥ एष प्रयुक्तो मधुना सर्वकार्याणि साधयेत् ॥२५॥ एषा सर्जर रस्ता
क्ष्यं चंदनं युवतीवचा ॥ श्टंगि चेभिः समे धूपा सर्वविश्वं विमोहयेत् ॥२६॥ अथ कामेश्वर मंत्रः ॥ प्रा
कामेश्वरे सुक्का प्रणवादि ततो मुकीं ॥ अनया थनवत्से वं व सत्तां क्लीं न्नतः पदं ॥२७॥ अथ कामेश्वरो मंत्रः श्र्क दंब कुसुमैः सह ॥ पलाशकुसुमैश्चाथ संजप्तो युन संख्यकाः ॥२८॥ तथा दशांशहोमेन सर्वसि
द्धि प्रदः स्मृतः ॥ अनेन जप्ता पुष्पादि दत्तं परम मोहनं ॥२९॥ अथ कामेश्वर मंत्र ॐ क्लीं सर्वजनमोह
नाय कामदेवाय नम इति ॥ चामुंडे मोहया नाथ वंश तां नय कामुकीं ॥ स्वाहा पदांत इत्युक्तः चामुंडा मंत्र उत्त
मः ॥३०॥ ॐ ह्रीं रक्त चामुंडे तुरु तुर अमुकीं वश मानय स्वाहा ॥ पलाशकुसुमै रेन ल लक्षं जप्वा दशांशतः ॥ होम

१६

नवाम विधिना सर्वसिद्धिं प्रविंदति ॥ ३१ ॥ इति मंत्रेण जप्त्वा नि सप्तधा कुसुमानि च ॥ दत्तानि वशगा कुर्युः कामि
नी नात्र संशयः ॥ ३२ ॥ अथ पद्मिनी वशीकरणं ॥ कामेश्वर पदं पूर्वं ॐकाराद्यथ मोहयं ॥ स्वाहांतं क्रममो मंत्र
नागवल्लीदले लिखेत् ॥ ३३ ॥ पुष्पेण मधुयुक्तेन रविवारेऽभिमंत्रयेत् ॥ शतधा दीयमानं तत्पद्मिनी वशतां न
येत् ॥ ३४ ॥ अथ चित्रिणी वशीकरणं ॥ ॐकाराद्धितयं प्रोक्तं विहंगमपदद्वयं ॥ कामदेवाय तस्मै च स्वाहेत्य
स्त्रमयो भवः ॥ ३५ ॥ पिष्ट्वा जाती फलं रंभामूलं तोये भावयेत् ॥ सेशो ष्य भानुकिरणैर्नागवल्लीदले क्षिपेत् ॥ ३६
नि मंत्र्यानेन मंत्रेण रविवारे प्रदापयेत् ॥ एतद्भक्षणमात्रेण चित्रिणी वशगा भवेत् ॥ ३७ ॥ अथ शंखिनी वशीक
रणं ॥ ॐ नमो ततः श्वोमिति च स्वाहांतं च पदद्वयं ॥ अयं महासिद्ध मंत्रः प्रकीर्तितः पर्वसूरिभिः ॥ ३८ ॥ मंत्रेणा
नेन संजप्तं मूलं तगरसंभवं ॥ श्रीफलं चैव संदद्या शंकिनी वशतां नयेत् ॥ ३९ ॥ अथ हस्तिनी वसीकरणं ॥ ॐ
कारोऽधिरियुग्मं च कामदेवाय चेत्यथ ॥ तस्मै स्वाहेति कथितो मंत्रश्रेष्ठो मुनीश्वरैः ॥ ४० ॥ कपोतपक्षसंपिष्यम

30

अ॰ ए॰
१७

धुनाथ निमंत्रयेत्॥ मंत्रमानेन तद्दानाद्धस्तिनी वशगा भवेत्॥ ४१॥ अथांगरागादिकमुच्यते॥ संमूर्छितानुरागानां रसुस
वविलासिनां॥ कामिनीप्रीतिजननमंगरागादिकं ब्रुवे॥ ४२॥ चंदनोशीरपथ्यार्तिलोध्राम्रत्वक् सद्रवः॥ लेपः स्वेदजदौ
र्गंध्यं हरत्याशु विलासिनां॥ ४३॥ पथ्यानिंबदलं लोध्रं दाडिमीससपत्रयोः॥ कल्कलश्च प्रलेपोयमंगदुर्गंधिनाश
नः॥ ४४॥ चिंचाफलं करंजस्य बीजैरथ हरीतकी॥ बिल्वमूलेन कक्षादिदुर्गंधहरणद्वयो॥ ४५॥ नागपुष्पावहृशीर
कोलमज्जांबुचंदनैः॥ लिप्तांगा विनिहंत्याशु दुर्गंधं घर्मवारितां॥ ४६॥ खनं पीकुतरोः पुष्पं तथा जंबूफलं समं॥ ए
तद्द्वहे निदाघेषु लिप्तं घर्मांबुनाशनं॥ ४७॥ पिचुमंददलं भोजलोध्रदाडिमवल्कलैः॥ निदाघकाले लिप्तांग घर्म
वारिं च यं जयेत्॥ ४८॥ शिरीषकेशरोशीरलोध्रैरंगविलेपनात्॥ न दृक्षप्यात्त्वघर्मा सुनिदाघेनैव विंदति॥ ४९॥
अथ स्नानीयसुगंधिः॥ बिल्वपत्रं मरुवकमशोककुसुमानि च॥ क्रमात्पुष्पाणि केतक्या क्षिप्तानि तैलेनै धापये
त्॥ ५०॥ आतपे शुष्कपुष्पाणि तस्मो निष्काशयेन्नरः॥ महापरिमलं तैलं ख्यातं योग्यं विलासिनां॥ ५१॥ एलांबुध १७

नखस्वर्णमांसीकर्चूरपत्रकैः॥ स्नात्वा सुगंधपरमं मूर्धजानां प्रविंदति॥५२॥ध्यात्रीस्वर्णघनोशीरप
थ्यामांसैर्विलेपनैः॥ स्नात्वा — सार्धमादत्ते केशाः सौरभ्यमुत्तमं॥५३॥ अथ सामान्यसुगंधिः॥ चंदनै
लासठीपत्राशिग्रु पथ्यांबुनोग्रदैः॥ समये लेपमुक्तोयं सुगंधः कामिवल्लभः॥५४॥ कर्पूरकुंकुमैर्लोध्रंच्छो
लेयं जलमंबुदः॥ उशीरश्च समैरेभिर्लेपस्यात्सुरभिः परः॥५५॥ पत्रांबुचंदनोशीरकृष्णागरुसमुद्भवः॥
लेपः कृतोयमंगेषु सौरभ्यं परं मं दिशेन्न॥५६॥ अथ सर्वोत्तमसुगंधः॥ कस्तूरीनागकुसुमं शैलेयं चंदनो
घनाः॥ श्रीवासः कनकाचंद्रो जातिस्क्षोणेयपूतिका॥५७॥ सुश्लक्ष्णपिष्टैरेभिस्तु नागवल्लदलोद्भवैः॥
रसैर्लेपः सुगंधोयमुक्तो योगो महीभुजां॥५८॥ स्यात्त्तोपदस्य भागैकं पथ्याभागचतुष्टयं॥ व्याधिःक्षो
णेयचंद्राणां प्रत्येकं भागयुग्मकं॥५९॥ शिलात्मजस्य पंच स्युर्नवभागनखस्य तु॥ एभिरुक्तसुगंधोयं क
स्तूरीदलसंज्ञकः॥६०॥ नखपथ्याभयाभोदं मांसीमीसकरंजकाः॥ समाः स्वर्णोत्तसोरुक्तं प्रत्येकं भाग

अ·रं०
१८

युग्मकं ॥ ६१ ॥ कर्पूरागरुकस्तूरीजातिक्षोणेयकस्य तु ॥ भागत्रयं स्यात्सर्वैः समेकं सर्वैरभिरिहोच्यते ॥ ६२ ॥ लेपः सौरभ्यगर्भाख्यः सर्वलोकमनोहरः ॥ भुजामेव योग्यो यमन्येषां दुर्लभः स्मृतः ॥ ६३ ॥ अथ मुखवासविधिः ॥ त्वक्पत्रैलालकः स्वर्णजातीभिः कारयेद्गुटी ॥ तांबूलयुक्ता सा मुक्ता वक्त्रं सुरभितां नयेत् ॥ ६४ केसरं कोलमज्जा च क्षोणेयं जातिसाम्यकं ॥ वटिका मधुनै नेषां त्वनावक्त्रं सुवासयेत् ॥ ६५ ॥ मुरा किंजल्ककुष्टानां चूर्णं लीढं हि संध्ययोः ॥ कर्पूरगंधिवदनं कुर्यान्मासार्धतो ध्रुवं ॥ ६६ ॥ कांभोजीबीजकुष्टोत्थं चूर्णं मधुघृतान्वितं ॥ यो लीढि मासांतं वक्त्रं केतकीगंधवद्भवेत् ॥ ६७ ॥ आम्रपत्ररसक्षारं मार्गवृक्षभवं पिबेत् ॥ संशोष्य भानुकिरणैः भक्ष्येतांबूलमध्यगं ॥ ६८ ॥ प्रातः प्रतिदिनं यस्तु सुगंधिः स्यात्तदाननं ॥ सर्वेषु मुखवासेषु योगोयमतिउत्तमः ॥ ६९ ॥ इति श्री अनंगरंगे सप्तमस्थलः ॥ ७ ॥

अथ विवाहाद्युदेशः ॥ विद्याशौर्यविवेकधैर्यसहिते शुद्धे स्वधर्मस्थिते विख्याते धनधान्यवैभवयुते १८

जाता समाने कुले ।। कन्या दोषविवर्जिता गुणवती सभ्रातृका सुंदरी सद्भिः शास्त्रविधानतः स्मरकलायो
ग्या विवाह्या सदा ।। १ ।। अथ कन्यालक्षणानि ।। नीलांभोरुहपत्रकांतिरथवा स्वर्णप्रभाभासुरा भृंगाभा नीलशि
रोरुहा शशिमुखी सारंगसावेक्षणा ।। स्याद्यस्याः तिलजप्रसून सदृशी नासा शुदंतावली सुश्रोत्रा पिकभाषि
णी च जलजग्रीवा च बिंबाधरा ।। २ ।। चक्राद्यांकितशोणपाणिचरणा क्षामोदरी स्वल्पभुग्रंभास्तंभमनोरमो
रुयुगला श्रेण्या दृढस्थान्विता ।। नाभ्यां चैव सुमिश्रपा गजगतिः शांताल्पनिद्रालसा शीलाढ्या सुकुमारिकाननख
रैः कन्या विवाह्या शुभाः ।। ३ ।। अथ कन्यादूषणानि ।। क्रूरा पिंगलकेशलोचनवती खर्वातिदीर्घा कृशा लंबोष्ठी
पृथुकंधरातिबहुभुक् श्यामाधरा तुंदरा ।। वाचाला विषमस्तनी द्रुतगतिः शूर्पश्रवाकोपिनी रूक्षा पल्लवाजि
ह्विका अतिकठिना सश्मश्रुका लोमशाः ।। ४ ।। निद्राशोकवती सदाथ चलनेयस्याः त्रकंपे धराहास्ये चानितरांगे
तौ प्रभनतौ गल्लौ स्पर्शं चं चला ।। अंगुष्ठाद्धिका भवेत् दुपगा पादे तथा नासिकासां स्थानो धरणी स्पृशेद्यस्य

अ॰र॰

१९

चेन्मध्या तु हीनामका ॥५॥ अज्ञाता गिरिपाक्षि म्रूहनदीनक्षत्रसंज्ञा यचाष्टो ढारोगसमाकुला च सबला भ्रू वल्लरीनि
स्नया ॥ गंडोष्ठं गान्विंनोविदघ्यती हीनाधिकांगी तथा दुशीला चविवादकर्मणि तदा त्याज्या वला पंडितैः ॥६॥ अ
थ जामातृ लक्षणानि ॥ विद्याशौर्यधनाश्रयो गुणनिधिः ख्यातो युवा सुंदरः स्वचारः सुकुलोद्भवो मधुरवाग्दा
ता दयासागरः ॥ भोगी भूरिकुटंबवान् स्थिरमतिः पापातिहीनो वली जामाता परिवर्णितः कविवरैरेवं विप्यः
सत्तमः ॥७॥ अथ जामातदूषणानि ॥ वृद्धो दुर्व्यसनो दयाविरहितो रोगी महापापवान् षंडो दुष्टकुलोद्भव
श्च पिशुनो द्यूते तिवद्धस्पृहः ॥ दारिद्र्यः कृपणो तिचंचलमति नित्यं प्रवासी ऋणी भिक्षुस्त्विह विवर्जितः सु
मतिभिः कार्यो वरो नेदृशः ॥८॥ अथ परस्त्रीगमन निषेधः ॥ आयुश्चाति विकिलता सुपहास्यता च निंदार्थहा
नि लघुतो विगतिः परत्र ॥ स्यादेवपद्यपिरते न परांगनाया प्राहुस्तथाप्यतद्यमिस्सापि कारणेन ॥९॥ लंकेश्व
रो जनकजाहरणेन वाली तारापहारकतया प्यथ कीचका ख्याः ॥ पांचालिकाग्रहणतो निधनं जगामत्र

१९

चेनसापिपरदाररतिंनकांक्षेत् ॥१०॥ अथकारणवशात्परस्त्रीगमनस्यावश्यत्वमुच्यते ॥ दृष्टिप्रेमपु
राभ्रमोप्यमनसिप्रोक्तोथसंकल्पकोनिद्राछेत्त्वथीरतरः शरीरतनुता लज्जाविनाशस्ततः ॥ वैराग्यं धै
विषयेष्वथोनिगदितो उन्मादमूर्छेततोमृत्युस्त्यादिति पंडितैः स्मरदशा उक्ता दशैव क्रमात् ॥११॥ उर्व
शीसुरताचिंतयाययौसंक्षयंकिलपुरूरवानृपः ॥ रक्षणायनिजजीवितस्यतंसंभवेत्परवधूनिकामतः ॥
॥१२॥ नारीचेत्तुनयोवनाभिलषितंकांतंनचेदाप्नुयादुन्मादंमरणंचविंदतितदाकंदर्पसंमोहनः ॥ संचि
त्येतिसमापरवधूरत्यर्थिनीस्वेच्छयागच्छेत्कामपिनसर्वदासुमतिमानित्याहवात्स्यायनः ॥१३॥ अपिद्वि
जश्रोत्रियभूपमित्रसंबंधिभार्यायदिपंचभुक्ताः ॥ स्युस्ताश्चदोषायनचेत्स्वगच्छेद्दूतोयुमान्कामनएवनैवं
॥१४॥ अथागम्यास्त्रियउच्यंते ॥ कन्याप्रव्रजितांसतींप्रियवधूंमित्रांगनांरोगिणींशिष्यांब्राह्मणवल्ल
भाथपतितोन्मानाचसंबंधिनी ॥ वृद्धाचार्यवधूश्चगर्भसहिताज्ञातामहापापिनीपिंगाकृष्णतमासदाबु
जिताम्सतीरिपुवधु

अ॰र॰
२०

धजनैस्त्याज्याइमायोषितः ॥ १५ ॥ अथ दूत्य उच्यंते ॥ मालाकारवधूस्सुवर्णकारवधूस्सूत्रधारवधूस्ससखीचविधवा धात्री वदी शिल्पिनी सैरंध्रीप्रतिगेहकायरजकीदासीच संबोधिनी ॥ बाला प्रव्रजिता चभिक्षुवनितातत्त्रस्यविक्रेत्रिका मान्या कारुवधूर्विदग्धपुरुषैः प्रेष्या इमा दूतिकाः ॥ १६ ॥ अथ मुखसाध्यलक्षणानि ॥ लज्जानम्रं न्यस्तेभिमुखंचपश्यसादेन भूमिं विलिखे त्स्थिता च ॥ व्यनक्ति गात्रं कुरुते च हास्यं दृष्ट्वा कटाक्षं नयने विदध्यात् ॥ १७ ॥ दृष्ट्वास्पष्टं सस्मितं वै मेवाक्यं शनैः र्व्रजेच्चानुसरेद्व्रजंतं ॥ विलोकयंतं व्याजकथाप्रसंगादुच्चैर्वदेत्तं परिदर्शयंती ॥ १८ ॥ तन्मित्त्रवर्गेप्रणयं विदध्यादित्यादि वार्त्तासमलक्ष्यपक्षेत् ॥ कतिस्त्रियो स्यालयगाः सुरूपा कस्या मयंप्रेत्य भूषं विदत्तदे ॥ १९ ॥ मुद्रामितिदृष्ट्वा स्वकुचौ करेण संस्फोटयेदंगिलिकाः स्टजंभं ॥ भूषा विहीनानददातितस्मैस्वदर्शनं याचितमप्यजस्रं ॥ २० ॥ पुष्पादिनाहंतितथांतितारं संकाशयेन्मार्ष्टि भुजं करेण ॥ व्याजेन गंडस्स्तदनं करांघ्रि वक्त्रे भुष्पमंबुवहेद्विलोक्य ॥ २१ ॥ इत्यादि चिन्हैरनुरागयुक्ताज्ञात्वा विदग्धा २०

37

स्तावकाक्षी॥ संप्रेषयेत्तां प्रति निर्विशंका दूतीं करा कामकलाप्रवीणां॥२२॥ अथ मुखसाध्यलक्षणा
र्इ आविध्यवा कलासु कुशला गोष्ठीपरा दुर्भगा क्लीबस्थूलकठोरवामजनरद्वेरूप्य भार्यासुयाः
नेशीति कातिचपला वंध्या महामानिनी प्रसुमान रूही महाविरहिणी साध्या सुखेनांगनाः
साध्यलक्षणानि॥ भर्त्तुः स्नेहवती दृढैकचनित्ता प्रेम्णा विहीना भृशं सेर्ष्याभूरिसुताग्रपा
स्त स्थिता प्रायेणार्थवती तथा परजनालापे विरक्ता सदा निर्लोभा व्यभिचारकर्मणि बुधै
॥२४॥ अथ त्याज्यस्थानावसराः॥ वन्हिब्राह्मणपूज्यगर्वनिकटे नद्यां च देवालये दुर्ग
ण्य श्मा नेदिवा संक्रांतौ शिसंक्रमेण शरदि ग्रीष्मे ज्वरे तीव्रते संध्यायां च परिस्थ
क्वचित्॥२५॥ अथ विवाहोद्देशः॥ विस्तीर्णे ललिते सुधाधवलिते चित्रादिते ले
महापुष्पादिधूपार्चते॥ संगीतांगविराजिते स्वभवने दीपप्रभाभासुरे निःशंके

मे
।कैंकांतया ॥ २८ ॥ इति अनंगरंगे विवाहाद्यद्देशः निरूपणो ऽष्टमस्थलः ॥ ८ ॥ अ
।ति मानुपभोगपूर्वकं सुरतं विदध्यीत कांतया ॥ परिरंभणमेव पंडितैः प्रथमं तेषु नि
।रूढं निलतंदुलाख्यं ललाटकं जाघनं विद्धकं च ॥ उरूपगूढकं द्वयदुग्धनीरे तत्रा
।त्र ॥ २ ॥ चरणकमलमेकेनांघ्रिणाक्रम्य भर्तुरपरपदसरोजेनाश्रयंतीतहूरं ॥ तरु
चुंबेनतांगी कथितमिह मुनींद्रैस्तद्धि वृक्षाधिरूढं ॥ ३ ॥ भुजयुग्मविपर्ययं मिथो घट
।श्वितं ॥ तिलतंदुलसंज्ञकं तदा परिरंभं कथयंति सूरयः ॥ ४ ॥ मिथो ललाटाक्षिकपो
।लुवल्ली मिथुनं घटेत ॥ रसातिरेकाद्यदि निस्तरंगललाटिकं तत्स्मवदंति संतः ॥ ५ ॥ जघनप
।श्रोणिदेशो स्वभर्तुर्निजभुजतिलकाभ्यां गाढमालिंग्य रागात् ॥ लुलितवसनकेशान् चुंबनं यत्र
।स्फुटमिह परिरंभं जघनं तं वदंति ॥ ६ ॥ स्थितं पतिं मीलितनेत्रयुग्मं यं श्चात्र प्रविद्धे द्वनिताकुचाभ्यां २१

॥५॥ त्यसेसो तामपि विद्धका ख्यामालिंगनं तन्मुनिभिः प्रदिष्टं ॥७॥ दोर्दंडमकामोन्मथितोंगनाया दूरूसुतं खे
रूयुगेन तत्र ॥ आपीडयेत्कांत उदीरतं तदुरूपगूढं परिरंभणं हि ॥८॥ अंके नितंबस्य पतिः सत्सुखस्थं कांति
समालिंगति यत्र गाढं ॥ मिथः प्रवेशं कुरुते निजांगैः स्यात्क्षीरनीरं परिरंभणं तत् ॥९॥ वल्लीव वृक्षं सरलां
गयष्टिं पतिं समालिंगति यत्र कांता ॥ चुंबेच्च रागात्कलति मंदसीत्काप्रोक्तं बुधैर्वल्लरिवेष्टितं तत् ॥१०॥ अ
थ चुंबनभेदाः ॥ अधराक्षिकपोलमुस्तकं वदनांतःस्तनयुग्मकं ध्वरं ॥ विहितानि पदानि पंडितैः परिरंभा
दनु चुंबनस्य ॥११॥ कक्षायुग्मं मन्मथमंदिरं च नाभेश्च मूलं स्मरलोकचिह्नाः ॥ चुंबन्ललाटे निजदेश
साम्यानत्वन्यतश्चुंबनरीतिरेषा ॥१२॥ नारीमुखांते वदनं स्वकीयं समानयेद्यत्र बलेन कांतः ॥ सानेव चुं
बेदनिकोपयुक्ता स्याच्चुंबनं तन्मिलिताभिधानं ॥१३॥ दयितस्य निवेश्य वक्त्रके निजवक्त्रं चुंबिताधर
नपि वेदबलात्तदाननं स्फुरिताख्यं किल चुंबनं तदा ॥१४॥ करस्य कांतस्य निमील्य नेत्रे जिह्वामुखांतर्वि

अ·रं·
२२

निधायचक्रं॥ चुंबेद्विलोलापरिमीलिताक्षीत — टितारव्यंकवयोवदंति॥१५॥ करेणकांताचिबुकंग्र
हीत्वादशोल्लतिःपश्चिमभागवर्ति। प्रियाधरंयत्रतनितिर्पगाख्यंप्रोक्तंकवींद्रैःखलुचुंबनंतत्॥१६॥
दंतेर्ग्रहीत्वामदनार्त्तिलोलाधरंविचुंब्याशुभचेत्स्वभर्तुः॥ कांतस्यदीपंकथितंकवींद्रैरितीतरोष्ठप
रिचुंबनंहि॥१७॥ आदायदंतच्छदमाशुपत्युः करांगुलीसंपुटकेननारी॥ जिह्वाग्रदेशेनघटेदशे
च्चेत्तच्चुंबनंपंडितसंज्ञकंस्यात्॥१८॥ प्रियाधरंस्वाधरसंपुटेनपिबेत्पतिःसापिनथैवभर्तुः॥ तत्सं
पुटाख्यंहनुवक्त्रसंज्ञंस्यात्केलिजिह्वाननस्तस्तदेव॥१९॥ संप्राप्तनिद्रांरहसिस्वकांतंचिरागतश्चुं
बतियत्रभर्त्ता॥ प्रोक्तंकवींद्रैःप्रतिबोधसंज्ञंतच्चुंबनंसर्वरसातिरेके॥२०॥ अधरोष्ठयुगेनकामि
नीपतिवक्त्रोष्ठयुगंखडिह्वया॥ परिपीड्यविचुंबनंत्यतेकथितंतद्विसमोष्टसंज्ञकं॥२१॥ अथन
खदानविधानं॥ ग्रीवाकरोरुजघनस्तनपृष्टिकक्षाहृत्पार्श्वगंडविषयेनखराःसुरास्युः॥ मानेन २२

वीनसुरते विरहे प्रवासे द्रव्यक्षतौ च विरतौ च मदे प्रयोज्याः ॥२२॥ नीरे नखा निर्मलतोज्वलत्वं वर्धिष्णु
ताथ स्फुटितत्वमेव ॥ आमार्दकं चेति गुणा नखानां बुधैः षडुक्ताः किल कामशास्त्रे ॥२३॥ अव्यक्तरेखं
कृतरोमहर्षं समर्पितं गंडकुचाधरेषु ॥ यत्कर्मसंपूर्णनखप्रभूतं विज्ञास्तदेवच्छुरितं वदंति ॥२४॥
ग्रीवाकुचे वक्रनखप्रहारो दत्तोर्धचंद्राख्य उदीरितोसौ ॥ एस्यैव चेदासुमुखे प्रयोज्या ॥ स्तदा बुधा मंड
लकं वदंति ॥२५॥ द्व्यंगुलादधिक एव नखप्रहारो मूर्ध्नोरुगुह्यकुचदेशसमीरितो यः ॥ रेखाद्वयं म
दनकेलिकलाविधिज्ञाः प्राहुस्तमेव तरुणस्य हितत्र भावः ॥२६॥ रेखा कृता सर्वनखै रधस्तादंगुष्ठमा
दाय कुचूकुकेयः ॥ मयूरपादं किल तं वदंति शशीकृतं सर्वनखैः कुचाग्रे ॥२७॥ रेखात्रयं पंच कुचेथवा गु
ह्ये कृतं भवेदुत्पलपत्रवच्चेत् ॥ अन्वर्थसंज्ञं प्रवदंति तद्विस्मर्तप्रवासावसरे दिशंति ॥२८॥ नखप्रयुक्ते
प्रणयाद्रसज्ञे यदेतदेवास्तिमनोभवस्य ॥ सर्वस्वमन्यं तदुखैकहेतुर्नास्मिन्किंचिद्द्र कामिनीनां ॥२९॥

अ॰र॰
२३

नखप्रदेशे सुरदाः प्रयोज्या ओष्टानना(?)नर्तनयनायहित्वा॥ हिंकारसीत्कारविशेषउक्तो दंतार्पणे कामक
लाविदग्धैः॥३०॥ रागस्पृशास्निग्धतराः समाना घनाश्च सूक्ष्माः साशिखाः समासः॥ दंताः प्रशस्ताः
अथखर्वरूक्षा करालवाह्यामलिनाश्च नि- ३१॥ अधरास्थितरागमात्र गेरदंते ख्यं किल गूढकं विदुः
दशनच्छदगंडपीडनादिदमुच्छूनकमुच्यते बुधैः॥३२॥ दंतोष्टयोर्योगविशेषसाध्यः प्रवालपूर्वो
मणिरेषउक्तः॥ अभ्यासयोगेन सदंपतिभ्यां संसाध्यते नान्यविनोदतस्तु॥३३॥ अधरेतिलकेच
कामिनां रदयुग्मे नविखंडिते कृते॥ इति विदुरुदितोखिलैर्दशनैः स्यात्कलविंदुमालकः॥ कपोलव
क्षोगलभालदेशे खंडाभ्रकं स्याद्दशनाग्रलेखं॥ तन्मंडलाकारकमंगनानां मेगेषु शोभनं लमतेनितां
तं॥३५॥ अखर्वसान्द्रादशनावलीयाकोताशरीरेक्रियते स्वभर्त्ता॥ प्रस्थानकालेप्रतहेतुमस्मा
त्कोलचर्चं प्रवदंति विज्ञाः॥३६॥ अथ केशग्रहणोद्देशः॥ स्निग्धघनाः कुंचितनीलवर्णाः केशाः

प्रशस्ताः स्तरुणीजनानां ॥ प्रेमप्रवृध्यै विधिनैषमंदस्त्राद्यान्नरैश्चुंबनदानकाले ॥ ३७ ॥ चिकुरान्
परिगृह्य चुंबतो करयुग्मेन पतिः प्रिया यदि ॥ समहस्तमित्यथैकतो मदिहस्लेनतरंगरंगकं ॥ ३८ ॥
परिवेष्ट्य करेण कुंतलान्मदनात्तर्यदि धारयेत्स्त्रियं ॥ इति केलिकलापकोविदाः कथयंतीति भुजंगव
ल्लिकां ॥ ३९ ॥ कर्णप्रदेशारूढकचानिगृह्य परस्परं चुंबति यत्र नारी ॥ पतिश्च रागात्स्फुरतावतारेकामा
वतंसः सकचग्रहस्यात् ॥ ४० ॥ इति प्रदिष्टा कति चित्प्रसिद्धाः क्रमान्मया बाह्यरतप्रकाराः ॥ प्रसि
द्धभावा बहुशोपरत्र न दार्शिता विस्तरशंकया च ॥ ४१ ॥ इति अनंगरंगसंभोगनिरूपणो नवमस्थल
॥ ९ ॥ अथ सुरतभेदा निरूप्यंते ॥ स्वात्स्यानुरूपं प्रविधाय पूर्वं विज्ञः पुमान्बाह्यरतोपचारान् ॥ कि
श्लथीभूतवरांगदेशां भजेत कांतां स्मरकेलिरंगे ॥ १ ॥ दृढापि नारी श्लथतामुपेति प्रसारणादूरुयुग
स्य सद्यः ॥ अपि श्लथा संयसितोरुयुग्मां गाढे दृढत्वं सुरतप्रसंगे ॥ २ ॥ उत्तानकं तिर्यगतासिताख्यं

स्थितंतथैवासनकंरतज्ञैः॥पंचप्रकारंसुरतंप्रदिष्टंतस्यप्रभेदान्क्रमतोब्रवीमि॥३॥अत्रादावुत्तानबंधः।
निधायपादौरमणांसयोश्चेदुत्तानसुप्तारमतेपुरंध्री॥प्रतिप्रबंधंसमपादसंज्ञंप्रोचुस्तदाभोगविधानद
क्षाः॥४॥उत्तानतायास्मरमंदिरेयःस्थितस्तदूरूद्वयमुद्गृहीत्वा॥संस्थाप्यबाह्वेकटितोरमेतकांतस्तदा
ख्यःकिलनागराख्यः॥स्त्रियोंघ्रिमेकंविनिधायभूमावन्यस्त्वमौलौनिजपाणियुग्मं॥पृथ्वींसमाधारय
मेतभर्त्तात्रैविभ्रमाख्यंकरणंतदास्यात्॥६॥तल्पप्रसृतानिजपाणियुग्मेमूर्ध्वीविधत्तेरमणीकराभ्यां॥
स्तनौगृहीत्वाथकरेणकांतोबंधस्तदावामपदाख्यउक्तः॥७॥कांतोरुयुग्मांतरगःस्वहस्तौनिधायभू
मौरमतेपतिश्चेत्॥बंधस्तदोक्तस्मरचक्रनामाश्रेष्टःसदाकामिजनस्यलोके॥८॥नारीस्वपादौदयि
तस्यवक्षःस्थितौसमालिंग्यकरद्वयेन॥किंचिंनतोरूरमतेतदासौप्रोक्तोमुनीन्द्रैरविदारिकाख्य॥९॥
उत्तानतोरुद्वयमध्यगामीदृढंसमालिंग्यभजेतयत्र॥कांतेविलासिप्रियएषबंधःसौम्याख्यउक्तः

२५

कविभिः पुराणेः॥१०॥ ऊरूयुगं वक्रमुदन्वितं च कृत्वांबुजाक्षी भजते पतिं चेत्॥ आनंदकर्षं तरुणीजनानां बंधोयमुक्तः किल जृंभिताख्यः॥११॥ कांतारे युग्मं परिवर्तितं चे निष्पीड्य कामाकुलचित्तवृत्तिः॥ रमेत भर्तायदि वेष्टिताख्यं तदेव बंधं मुनयो वदंति॥१२॥ स्कंधप्रदेशे विनिधाय जंघामेकां स्त्रियेन्यामथ संविदार्यः॥ अथो विनीतप्रवलं रमेत भर्तायदा वेणुरुदीरितं तत्॥१३॥ विलासिनी संहतमूरुयुग्मं कृत्वोर्ध्वमालिंग्य भजेत भर्ता॥ उद्भग्नकः स्यात् प्रमदांघ्रियुग्मे कांतोरु सिक्ते स्फुटमान्यप्रदिष्टः॥१४॥ अथातिर्यग्बंधः॥ कांताघ्रिमेकं हृदये स्वकीये निधाय भर्ता शयने द्वितीय॥ कुर्या इतिं चेदति वीणकार - प्रौढांगनायां परिकल्पनीयः॥१५॥ पार्श्व - सुप्तः प्रमदोप्रसिक्तः कांतां समालिंग्य पतिं करोति॥ यत्र प्रदिष्टो मुनिभिः पुराणैर्बंधस्तदा संपुटनामधेयः॥१६॥ यद्यंगनाकुंचितपादयुग्मं स्वनाभिदेशे परिकल्प भर्ता॥ रतिं प्रकुर्यादति कर्कटाख्यं तदा कवींद्रैः करणं प्रदिष्टं॥१७॥ अथोपविष्टबंधः प्रेंखा विलासं प्रसभं वहंत्या विपर्ययाज्जं

घयुगेस्यनार्याः॥पद्मासनंस्याद्यदथचेकजंघाविपर्ययामात्तपपदंप्रदिष्टं॥१८॥स्वजानुयुग्मांतरनिर्गतेचे
द्भुजौस्वकंठेविनयेन्मृगाक्षी॥कांतापिकृत्वापिविधिंप्रगच्छेत्तदाबुधैर्बंधुरिताख्यमुक्तं॥१९॥उक्तप्रकारेयं
दिदंपतीस्वभुजौतुत्कृत्वामणिकूर्परस्थे॥स्थिरंरमेत्तेकरणंप्रदिष्टंतदाकवींद्रैःफणिपाशसंज्ञं॥२०॥निधा
यजंघायुगुलंयुवत्याःस्वकीययोःकर्पूरयोरथास्याः॥कंठेस्वबाहुपरिणीयगच्छेत्सतिस्तदासयंमनाख्यमे
तत॥२१॥सुखेसुखबाहुंयुगेस्वबाहुंजंघायुगंचयुगंनिवेश्य॥गच्छेत्सतिश्चेदितिकौर्मकाख्यमूर्ध्वोरु
युग्मात्परिवर्त्तिताख्यं॥२२॥स्थितास्त्रियंकुंचितपादयुग्मांतथैवभर्त्तावरुनतीर्यगंगः॥भजेत्तचेत्कामकला
विदग्धोबंधस्तदायुग्मपदंवदंति॥२३॥विलासिनीकूर्परमध्यवर्तिकटीस्वकीयांभ्रमयन्मुहुश्चेत॥भ
जेतभर्त्तेतिविनर्त्तितंस्यात्तन्मार्कटंसन्मुखसंगमेन॥२४॥अथाभितबंधः॥संवेष्टयित्वानिजकूर्परेणजा
त्वंगनायाअवलंब्यकंठं॥रतिंप्रकुर्यादितिकूर्पराख्योबंधःप्रदिष्टःसचजानुपूर्वः॥२५॥उक्तप्रकारेक २५

रणे यदैकः पादोभवदूर्ध्वरूतोगनायाः॥ तदाप्रदिष्टोहरविक्रमाख्यो बंधः प्रियोयं तरुणीजनानां॥ स्कं
कंठं भुजाभ्यामचलं व्यभर्त्तुः श्रोणीनिजोरूयुगुलेनगाढं॥ संवेष्ट्य कुर्याद्रतमंगना चेदुक्तः कवींद्रैरिति
कीर्तिबंधः॥२७॥ अथोवैमान्यबंधः॥ विस्तन्यपाण्यंघ्रियुगं धरिण्यामधोमुखीधेनुवदत्रसंस्था
स्त्रीस्याद्यथास्याः कटिदेशवर्त्ती भर्त्ताभजेद्धेनुकमेतदुक्तं॥२८॥ हस्तयुगुलं निजेपदेयोषिदेति कटिरू
ढवल्लभः॥ अग्रंतोयदिशनैरधोमुखीधेनुकं वृषवदुन्नतेप्रिये॥२९॥ इतिपाठः अधोमुखीमस्तक
दोःकुचास्येभुजंगतान्कापतियत्रनारी॥ करीवभर्त्तारतिलोलचित्तस्तदैवसंज्ञंकरणंप्रदिष्टं॥३०॥ ग
पणसौकरगार्ध्वभादिकन्याप्रयोजकतयात्रभूरिशः॥ अप्रसिद्धकरणानिनोमयादर्शितान्यतिविवि
दृतानि च॥३१॥ अथपुरुषायितबंधाः॥ जातश्रमंवीक्ष्यतिंपुरंध्री स्वेच्छानएवाथरपेक्षरत्ता॥ कंदर्पवे
गाकुलिता नतोतंकुचस्तनुस्येपुरुषायितासा॥३२॥ उत्तानसुप्तंदयितं भुजाभ्यामालिंग्यलिंगोविनियोश्य

अ.रं.
२६

योनौ॥भुजेन्नितंबंपरिचालयंतींतारीतदास्याद्विपरीतबंधः॥३३॥सुप्तस्यपुंसोजघनोपरिस्थितासंभ्राम
यत्यंघ्रियुगंविकुंचितं॥चक्राकृतस्त्रीनरवद्विचेष्टितेनभ्रामराख्यंकरणंसमीरितं॥३४॥प्रेंखविभ्रमवती
स्मरयंत्रेभर्तृलिंगमुपधायपुरंध्री॥भ्रामयेत्कटिमनंगविलोलास्यात्तदाकरणमुत्कलिताख्यं॥३५॥
विपरीतरतेसमीहतादरहासातिमनोरमानना॥करवाद्यवशंगतोसिमेस्मरयुद्धेविजितोसिचाप्य
लं॥३६॥इतिमंजुरटंस्तथाकुलासकचाकर्षणचुंबिताधरा॥श्रममीलितचारुलोचनाद्रवतांयातिती
तदाविलासिनी॥३७॥श्लथदेहलतांसमर्छनोदरसन्मीलितलोचनस्तलां॥समवेक्ष्यरतांतनिःस
हामवगच्छेद्वलांद्रुतामिति॥३८॥करिणीहरिणीचगर्भिणीनवसूतामृतुयोगिनीरुशां॥ज्वरतांच
कुमारिकांतथासुरतेथोपरिवर्जयेत्सुधी॥३९॥अथकरताडनसीत्कृतोद्देशः॥कामयुद्धांगयुग्मस्य
करताडनसीत्कृते॥ताडनंतुचतुर्धोक्तंसीत्कृतंपंचधास्मृतं॥४०॥प्रसृतेनापिहस्तेनमुष्टिनासम २६

पाणिना ॥ ताडनं स्याच्चतुर्द्वैवं तस्य स्थानानि संब्रुवे ॥ ४१ ॥ पार्श्वेगुह्येसमतलंमुष्टिपृष्टेचमूर्ध्वनि ॥ फण
कारेप्रसृतिकंयुंज्यादुद्यनहस्तकं ॥ ४२ ॥ अथताडनभेदाः ॥ विपरीतत्तरतेयद्दोमभाहृदिमुष्ट्यापरिताड
येत्पतिं ॥ करघातनकंतदाबुध्यैरितिसंतानिकसंज्ञमुच्यते ॥ ४३ ॥ विस्तीर्णहस्तेनरतोयदास्त्रीहन्यात्प
तिंस्यात्सपताकसंज्ञः ॥ अंगुष्टकेनैवकृतप्रहारोविज्ञैःसउक्तोकिलबिंदुमालः ॥ ४४ ॥ सांगुष्टमध्यांगु
लिकप्रहारंशनैःपुरंध्रीकुरुतेनिरागात्यघेपउकृतःकविभिःपुराणेरानंदकुंडलनामधेयः ॥ ४५ ॥ अथ
सीत्कृतभेदांश्चपंचैवक्रमतोब्रुवे ॥ हिंकृतंस्तनितंसीत्कृतंदूत्कृतंफूत्कृतंतथा ॥ ४६ ॥ उच्छ्वासेमुखनासा
भ्यांहिंकृतंचाभिजायते ॥ स्तनितंमेघगंभीरंघोषवत्तदतःस्मृतं ॥ ४७ ॥ सीत्कृतंतुभुजगोच्छ्वासोवत्स्याद
धोत्कृतं ॥ वेणर्विस्फोटनारांचतुल्यंस्याद्दपफूत्कृतं ॥ ४८ ॥ मेघविंदुर्यथातोयेनिपातेन्त्वद्द्रवाकृतिः ॥ सी
त्कृतश्चेतिपंचैवक्रमाद्देतासमीरितैः ॥ ४९ ॥ लावकोकिलकपोतहंसिकानीलकंठतरुसंनिभंक्रमात् ॥

अ.र.
२८

संदधाति किलहिंस्रतां विकांक्षिन्न भोगसमये विलासिनी ।। ५० ।। सुरते दशनच्छदं यथा प्रमदायाः परिखंड्यते
भृशं ।। दयितं न मदातिरागतः क्रियते सीत्कृतमंजसा तया ।। ५१ ।। अथाष्टमहानायिकावर्णनं ।। निखिलसुरत
चिन्हैः रंकिनांगः सपत्न्या अरुणकलशनेत्रो निद्रिताजीवतेशः ।। सभयमधुरवाक्यैः प्रांतरम्ये नियस्याः कथयति
रमत्तस्तां खंडिताख्यं पुरंध्री ।। ५२ ।। वनिता सुभवासवेशनि मृदुशय्यामधुवासिनी निशी ।। पतिमार्गचिरार्तितें
क्षणा कथिता वासज्जिकबुध्यैः ।। ५३ ।। सागध्ययाचरणगं दयितं प्रचंडवाक्यैर्निरस्य बहुलं पततएव पश्चात् ।।
संजायते विरहतापविलापदीना यात्तां वदंति कलहांतरितां कवींद्राः ।। ५४ ।। मदनाकुलिता तिनिषपाकतभूषा
निशि गूढचारिणी ।। सुरताय परालयं व्रजेल्कवयस्त्वामभिसारिकां जगुः ।। ५५ ।। प्रियतमामुपनेतुं प्रेषदेत्सैवदू
तीं स्वयमतिरतिलोला याति संकेतदेशं ।। तदनुपतिविहीनामागतां वीक्ष्य तां या वहति प्रलयतां यं मोच्यते वि
प्रलब्धा ।। ५६ ।। दयिते परदेशसंस्थिते शशीपंकेरुहचंदनादिभिः ।। परितप्यत एतद्वपुः कथिता साकविभि

२८

अ॰र॰ योगिनी ॥५७॥ वैराग्यवान्सकलकेलिकलाकलापे कांतो जहाति न स कासमनंगलोल्यन् ॥ यस्यास्त्रियः
२८ सुरतसौख्यविचिंतिता सा स्वाधीनपूर्वपतिकेति विचक्षणैः प्रदिष्टः ॥५८॥ विविधकुसुममालाभूषितांगी म
नोज्ञा सुरतरसविलोला स्वानुरागा स्वकांते ॥ निवसति चदुलाक्षी वासगेहे चिरं या वरकविभिरिहोक्ता सा
तदोत्कंठितेति ॥५९॥ सुविदितपरमार्थः कामशास्त्रस्य विद्वान् विविधरतिविनोदैः कामिनीनां मनांसि
॥ अनुदिनमनुरागाद्रंजयेद्यः सलीलं फलमविकलमेव प्राप्नुयाज्जन्मनः सः ॥६०॥ यावच्छंकरमौलिलिगा
सुरनदी गौरी तदर्द्धंगगा यावद्धेमवतीपयोधितनया वैकुंठनाथे हरौ ॥ वेदाभ्यां सरतो विरंचिरपि भूर्या
वद्दिनेशः शशी भूयात्तावदनंगरंगक इति प्रत्येसदा कामिनाम् ॥६१॥ इति श्रीमल्लाडखानविनोदाय राज
र्षिमहाकविकल्याणमल्लविरचिते अनंगरंगे संभोगनिरूपणं नाम दशमस्स्थलः ॥१०॥ श्रीकृष्णार्पणम
स्तु ॥ श्रीवाराणस्यां माघ शुक्ल १ तद्दिने इदं पुस्तकं समाप्तम् शुभमभूयात् ॥ श्रीसांबायनमः ॥ कृष्णभट्ट २८
हर्वे

[OrderDescription]
,CREATED=18.10.20 16:10
,TRANSFERRED=2020/10/18 at 16:15:57
,PAGES=52
,TYPE=STD
,NAME=S0004143
,Book Name=M-1815-CHANDISTROT PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,